Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 3 | ISSN : 2582-0095

# शिशुशिक्षणाय कथाशिक्षणविधयः

**डॉ.दशरथभरासागरः**
सहायकाचार्यः, केन्द्रीसंस्कृतविश्वविद्यलयः, क.जे.सोमैयापरिसरः, मुम्बई ।

**Article Info**
Volume 5, Issue 3
Page Number : 08-13
**Publication Issue :**
May-June-2022
**Article History**
Accepted : 05 May 2022
Published : 15 May 2022

**शोधसारः**:- बालानां कृते शिक्षकः कथं शिक्षणं कुर्यात् । एतदर्थं शिक्षणविधयः प्रत्येकस्तरे शिक्षणविधयः शिक्षाविद्भिः निर्धारिताः। अतःबालशिक्षायाः उद्देश्यमपि वर्त्तते । संस्कृतशिक्षणे मदुमनस्कानां बालानां कृते लघु लघुकथामाध्यमेन आदौ शिक्षयेत्। तेन तेषां रुचिः जागरिता भवति । अत्र बालानां कृते कथं शिक्षा सरला भवेत्। एतदर्थमत्र शिक्षणविधयः पत्रेऽस्मिन् चर्चिताः। तथाहि –कथाविधिः, क्रीडाविधिः, अभिनयविधिः, प्रत्यक्षविधिः, प्रतिमानविधिः, चित्रविधिः इत्यदयः।

**प्रमुखबिन्दवः**:- नाटकबोधः, कथाबोधः, साहित्यतत्वज्ञानम्, बालविधेः ज्ञानम्, शिशुस्तरबोधः, मानसिकक्षमतापरीक्षणम् , गुणवत्तापरिवर्धनम्, मनोवैज्ञानिकविधेः ज्ञानम् इत्यादय अत्र शोधबिन्दवः वर्त्तन्ते ।

समस्ताखिलमण्डले शिक्षा मनुजानां दीव्यनेत्रं तृतीयनेत्रं वा भवति। इयं मानवस्य उत मानवसमाजस्य अभिन्नमंगं वर्तते।तत्रानेन अंगेन मानवसमाजः सम्यक् विश्वं चलितुं शक्तो भवति।अपराह–ऐहिकामुष्मिकाणां समस्तसमस्यानां समुचितसमाधानात्मकं तत्वं ज्ञानं पर्यायफलेन शिक्षेतिफलितम्। औपनिषद्यां शिक्षा व्याख्यास्यामः इत्यादौ आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपं विद्या सन्धिः प्रवचनं सन्धानमिति तत्र शिक्षा बहुमुखी प्रक्रिया अस्तीति भाषते, शिक्षणं तु एकमुखी (Mono polar),द्विमुखी (Bipolar),त्रिमुखी (Tripolar), बहुमुखी (Multipolar) भवति ।यत्र केवलं गुरुकेन्द्रिता शिक्षा तत्र तु एकमुखी प्रक्रिया शिक्षायाः,यत्र उभयोः योगदानं वर्तते तदा द्विमुखी प्रक्रिया,यदा छात्रशिक्षकपाठ्यक्रमाणां योगदानं तदा त्रीमुखी प्रक्रिया,यदा प्रवचनमपि जायते तदानीं शिक्षेयं प्रक्रिया वर्तते,पुरा क्वचित् शिक्षा गुरुकेन्द्रिता एकमुखी आसीत्।अतः आधुनिककाले छात्रकेन्द्रित शिक्षा,अस्मिन् प्रक्रमे शिक्षणं कथं भवति ?कुत्र शिक्षा दातव्या ? किं दातव्यम् ?इत्यादीनां समस्यानां समाधानमित्थम्- समाजस्य समुचितावश्यकता विज्ञाय शिक्षकाः छात्रान् शैक्षिक वातावरणे तान् विषयान् विधिप्रविधीभ्यां शिक्षयन्ति,ते च छात्राः सम्यगर्थान् विज्ञाय उपाधिमर्जयन् लोकोपकारकाय तां विद्यां तदूत्तरवर्तिनां कृते शैक्षिकवातावरणे स्वज्ञातस्य स्थानान्तरणं कृत्वा प्रत्यक्षपरोक्षाभ्यां समाजस्य राष्ट्रस्य वा मङ्गलं करोति ।तेन राष्ट्रोन्नत्यै कश्चित् प्रमुखः प्रयासःअस्ति ।यथा कश्चन कृषको अन्यान् पोषयति तत्रावश्यमेव राष्ट्रविकासे अंशतः संलग्नः एव स ।यदि देशे तत् तत् क्षेत्रे कार्यकराणां अभियन्तृणां, वैज्ञानिकानां शिक्षकाणां वा अभावः स्यात् तर्हि देशस्य सामाजिक–आर्थिक–नैतिक–धार्मिक–सांस्कृतिक स्तरेषु न्यूनता आगछति,तदर्थं समाजे विद्यमानानां जनानां सम्यक् पोषणाय वर्धनाय पारलौकिकसत्ता ज्ञापनाय च सर्वाः विद्याः अपेक्षिता तासां समासां विद्यानां ज्ञानाय नियमपूर्वक शिक्षणमपेक्षितम्, धार्मिक,सांस्कृतिक, नैतिक, सामाजिक–विकासाय आदौ मूल्यानां ज्ञानमावश्यकं स्यात् मूल्येभ्यः व्यवहारज्ञानां व्यवहारात् व्यक्तित्वविकासः व्यक्तित्व विकासे सदाचरणैः सामाजिकानां सुःखदुःखादीन् अनुभवितुमर्हति,कथाशिक्षणेन मील्यानां बोधः जायते तर्हि का नाम कथा ? कति भेदाः तस्याः ?कानि प्रयोजनानि कथाशिक्षणस्य ? एतेषां प्रश्नानां समाधानमित्यम्

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**सर्गबद्धोऽभिनेयार्थं तथैवाख्यायिका कथे ।**

**अनिवद्धं च काव्यादि तत् पुन: पञ्चोच्यते ।।**

1. सर्गबद्ध काव्यम्,खण्डकाव्यम्,महाकाव्यम्,गीतिकाव्यम् ।
2. नाटकम्
3. आख्ययिका
4. कथा
5. मुक्तककाव्यम्

कथा कल्पित वृत्तान्ता सत्यर्थाSख्यायिकामहा इति ।कथ्यते अनया शैल्या विविधान् विषयान् सा कथेति ।तत्र द्विधा पशुपक्षीणां प्रसङ्गवर्णनं कल्पनेभ्य: सा कथा,आख्यानं तु कथितेतिहासस्य यथायथं वर्णनमाख्यानमभिधीयते ।कथासाहित्यस्य भेदा:




वस्तुत: कथा इति जातिपक्षस्वीकारे एकधैव समासां बोध:।अत: सामान्यगद्यापेक्षया अस्या: अध्यापनं भिन्नं,यावत् कथाया: आवश्यकताया: ध्यानं न दीयते तावत् उद्देश्यानि अपि न सिद्ध्यन्ति ।कथाशिक्षणे पुस्तकं सत्यपि मौखिकरूपेण कथाकथनं कुर्यात् ।कथानां भाषा अतीव सरला स्पष्टा च स्यात् ।प्रश्नकरणं तु गद्यैव करणीय: ।कथाशिक्षणक्रम: अनेनक्रमेण स्यात् ।सामान्यपरिचय:,सामान्योद्देश्यानि,विशिष्टोद्देश्यानि,पूरवज्ञानं प्रस्तावना,उद्देश्यकथनम्,पाठोपस्थापनम्,अध्यापककथनम्,बोधप्रश्ना:,नवशब्दव्याख्या,मूलकथाया:शुद्धोच्चारणम्,उत्प्रेरणा प्रश्न:,कथानिष्कासनम्,गृहकार्यं तत्र सन्ति कथाशिक्षणस्य प्राथमिकस्तरे प्रयोजनानि ।तथाहि

**कथशिक्षस्योद्देश्यानि** (Objectives of story Teaching)

1.संस्कृतकथासाहित्यस्य परिचय: ।

2.कल्पनाशक्ते: विकास: ।

3.बालकानां चरित्रनिर्माणम् ।

4.समाजस्य सन्नागरिकाणां निर्माणनम् ।

5.बालकान्तर्निहित समुचित शक्तीनां विचाराणां वा बहिरानयनम् ।

6.परोक्षतया कथागत शैक्षिकसामाजिकनैतिकाध्यात्मिकमूल्यानामुपदेश:।

7.मनोरञ्जनेन सह बालकस्य ज्ञान विकास: ।

8.लघु लघु संस्कृतकथा निर्माणे क्षमतोत्पादनम् ।

9.संस्कृत सम्भाषणे रुच्युत्पादनम् ।

10.स्मृतिशक्ते: विकासश्च ।

एतेषामुद्देश्यानां परिपूरणे प्राथमिकस्तरे कथाशिक्षणे आवश्यकं स्तरानुगुणं विधिरिति ।सन्ति स्तरेऽस्मिन् कथाशिक्षणस्य विधय:।ते च-

**कथाशिक्षणस्य विधय:** (Methods of Stories)

अभिनयविधि:। चित्रविधि:। कल्पनाविधि:। संवादविधि:। उपकरणविधि:। व्याख्यानविधि:। इति

**अभिनयविधि:**

शिक्षक: आदौ सम्यक्तया पूर्वलुसिद्धाता कृत्वैव कक्ष्यां गच्छति । तत्र कथापाठने कथागत प्रत्येक वाक्यानुसारं स्वस्य हावभावादीनां प्रदर्शनं करोति । तेन प्रदर्शनेन कथागत रसानां सन्दर्भाणां वा ज्ञानं सरलतया बालानां कृते भवति । बाला: सिक्षकस्य क्रोधम्,हासम्,दु:खम् ,सुखम्,चिन्तनम्,विस्मयम्,हीनभावान् इत्यादीन् अनुभूय प्रसङ्गं समनुगच्छन्ति । सहैवानुकरणं कुर्वन्ति बाला:। शिक्षक: कतथागतदृश्यं स्वाभिनयेन बालानां दृष्टिपुरत: स्थापयति । बाला अपि शिक्षकस्य भावम्,सङ्केतम्,कटाक्षादीन् अभिविज्ञाय पाठगतभावान् विषयांश्च अवगच्छन्ति । तेन स्वयमपि कथानिहितमूल्यानि अभिज्ञातुं प्रभवन्ति ।सहैव विविधा: भावना: तेषां बालानां हृदयेषु विकसिता: भवन्ति । अनेन बाला: स्वपाठ्यविषयं समीचीनतया गृह्णन्ति ।तेन सह मनोरंजनमपि भवति । तत्र केचन बाला: कक्ष्यायां यामितां नानुभवन्ति ।

**चित्रविधि:**

कथाशिक्षणे कथानुगुणं चित्रं निर्मीय शिक्षक: आनयति एवं कथागत सर्ने अंशा: बालान् चित्रमाध्यमेन बोधयति,यदि चित्रे स्पष्टता भवति,चेत् सर्वे बाला: कथागत सर्वे विषया: अवगन्तुं प्रभवन्ति तेन उभयो: शिक्षकबालयो: सक्रियतां द्रष्टुं शक्यते । तत्र बाला: चित्रमवलोक्यैव सन्दर्भं स्मर्तुं शक्नुवन्ति ।अनेन विषया: तेषां मनसि चिरकालं तिष्ठन्ति ।ते च विषया: बालानां स्वजीवने महती भवति ।तदर्थं बालानां कृते शिक्षप्रदानं सरलभाषया चित्रमाध्यमेन बोधयति,यदि चित्रे स्पष्टता भवति,तर्हि सरवे बाला: कथागत सर्वे विषया: अवगन्तु प्रभवन्ति ।अनेन उभयो: शिक्षकबालयो: सक्रियता द्रष्टुं शक्यता तत्र बाला: चित्रमवलोक्यैव सन्दर्भं स्मर्तुं शक्नुवन्ति ।सर्वे बिषया: चिरकालं तिष्ठन्ति ।अत: बालानां कृते शिक्षप्रदानं सरलभाषया चित्रमाध्यमेन करणीयमिति ।

**कल्पनाविधि:**

कथाशिक्षणप्रक्रमे शिक्षक: कथां कथयन् पशु-पक्षीणां विषये वदति ।तदानीं बाला:स्वकक्ष्यावातावरणे एव वनमयं चिन्तयति एवं स्वस्य मानसपटले ईषद् बलं दत्वा सिंहादीनां मनसि आकृतिं स्मरन्ति तेन तस्मिन् वास्तविकं सिंह कल्पयति ।न तु कथागत सिंहोऽस्ति ।तदा तस्य बालस्य सम्यक् कथाया: भाव: अवगत: स्यात् ।कथागत भावाबोधे चिन्तनं प्राधान्यं तत्र प्राधान्यताया: कारणम् उभयो: कथाशिक्षणे कथागत कल्पना कृता ।अनेन नूतना कथा, पूर्वश्रुतानां कथानां स्मरणं भविष्यति ।तेनैव कथानिर्माणे रुचिर्भवति ।

**संवादविधि:**

शिक्षक:कथापात्राणां कथाकथनप्रसङ्गे स्वबालैस्सह वार्तालापं करोति तथा परस्परं बालानां साहाय्येन सम्पूर्णकथां कक्ष्यायां शिक्षक: कथयति ।पात्राणां कथने महत्वप्रदानात् तथा च बालानां प्रतिक्रिया: वार्तालापै: अवगमनादयं नाम संवादविधिरुच्यते ।माध्यमिकस्तरेऽपि अस्य विधे: प्रयोगं कर्तुं शक्नोति शिक्षक: ।

**कथोपकथनविधि:**

कथितस्यकथनं कथोपकथनमुच्यते, प्रकृतौ शिक्षक: बहुमुल्यमयीं कथां श्रुतवान् तामेव कथा बालेभ्य: श्रावणीयं चेत् तत्र कथागत ये च भावा: यत्र पूर्ववाचकेन यथा श्रावितं तथैव यथायथं श्रावणं कष्टमेव तथापि शिक्षक: स्वप्रयासै: यथायथं बालानां पुरत: श्रावयति ।तदानीं तां कथां श्रुत्वा सर्वे बाला: मनोरञ्जनेन सह मील्यानि गृह्णन्ति, पुनश्च कदाचित् गृहं गत्वाऽपि स्वमित्रान् भ्रातृन् च यथायथं श्रावयन्ति ।अस्यविधे: लाभोऽस्ति यत् स्मृते: शक्ते: विकास: अरथावगमनपुरस्सरं स्मरणमिति ।

**उपकरणविधि:**

अस्मिन् विधौ श्राव्यदृश्योपकरणं भवति तेन माध्यमेन बालानां कृते कथाशिक्षणं भवति ।तदर्थं कक्ष्यावातावरणमपि सामान्यापेक्षया परिवर्तनीयम् ।तेन बालानामधिगमे न बाधा जायेत ।सन्ति बहूनि उपकरणानि कथां बोधयितुम् ।तानि दृश्योपकरणानि-श्रव्योपकरणानि-दृश्यश्रव्योपकरणानि च वर्णानां, पदार्थानाञ्च स्वरूपं दर्शयितुं युज्यते तानि दृश्योपकरणानि ।यथा-हरितफलकम्, चित्राणि, रेखाचित्राणि, मानचित्राणि, छायाचित्राणि, प्रतिकृतय: प्रदर्शिनी इत्यादीनि ।

विविधान् ध्वनीन् शब्दांश्च, श्रोतुमुपयुक्तमुपकरणम् ।यथा-रेडियो,ग्रामोफोन्, टेपरिकार्डर, सान्द्रमुद्रिकाचालक:(C.D Player) इत्यदीनि ।

द्रष्टुं श्रोतुञ्च योग्यमुपकरणं श्रव्यदृश्योपकरणम् ।यथा-नाटकम्, चलनचित्रम्, दूरदर्शनम्,सङ्गणकमित्यादीनि ।

सम्प्रति उपकरणानां माध्यमेन कथाशिक्षणं छात्राणांकृते विशिष्य प्राथमिकस्तरे बहु लाभाय भवति ।घटं नय घटमानय इत्यादि कथनेन साक्षात् पश्यन् घटम् इति वदन् शृण्वन् समन्वयं संस्थाप्य तदनन्तरं केवलं घटपदेन श्रवणेनापि घटाकृतिकज्ञानं जायेत तद्वदिहापि कथागत् चित्राणां ध्वनिं श्रुत्वा इन्द्रियसन्निकर्षात् विषयं चिरकालं तिष्ठति बालानां मनसि ।अत: बालानां कृते कथाशिक्षणे शिक्षकै:उपकरणानां साहाय्यम् अवश्यं स्वीकरणीयमिति ।

**व्याख्यानविधि:**

शिक्षक: प्रथमिकस्तरीय छात्रान् कथागत शब्दानां विविधप्रचलित उदाहरणेश्च कथाया: व्याख्यान्ं करोति सरलरीत्या येन लघु लघु बाला: सम्यगवगच्छेयु: ।तत्र पंक्ते क्वचित् बालानां पुरत: साक्षात् अर्थं कथयति तेन बाला: तत्पदार्थं विज्ञाय स्वबुद्धौ स्थापयन्ति ।तदा ते अत्यन्त सरलया भाषया अन्यानि मित्राणि श्रावयन्ति ।कदाचित् शिक्षकस्य व्याख्याने प्रभाव: अधिको न भवति,तर्हि कथाया: विस्मरणं जायते तदानीं कथाया: रूपं परिवर्तितो भवति,तदर्थं व्याख्यानं शिक्षकै: स्पष्टतया सदृष्टान्तेने सरलवाक्यश्च करणीयमिति ।

**पूर्वप्राथमिकस्तरे पाठ्यक्रमनिदर्शनम्**

हिन्दीवर्णपरिचय:,वर्णोच्चारणम्

संस्कृतवर्णपरिचय:, वर्णोच्चारणम्

पदपरिचय:,पदोच्चारणम्

सचित्रपशुपरिचय:,पशुनामोच्चारणम्

सचित्रपक्षीपरिचय:,पक्षीनामोच्चारणम्

सचित्रपुष्परिचय:,पुष्पनामोच्चारणम्

सचित्रगृहवस्तुपरिचय:,गृहवस्तुनामोच्चारणम्

सचित्रवाहनपरिचय:,वाहननामोच्चारणम्

शरीरावयवानां सङ्केत:, तेषामुच्चारणञ्च

वासराणां समुच्चारणाभ्यास:

मासानां समुच्चारणाभ्यास:

हिन्दी तथा संस्कृत गायनाभ्यास: ।

कथाश्रवणम् एवं कथाकथनम् इत्यादय: ।

**कथाया: महत्वम्**

कथासाहित्यं जनानां कृते आदियुगादेव मनोरञ्जनपुरसरं कालक्षेपाय प्रवर्तते ।कथा अद्यापि मनोरञ्जनेन साकं ज्ञानात्मक-नैतिक-आचारशिक्षादीनां स्रोत: अस्ति ।पुराकालादेव अस्या: महत्वमस्माभि: स्वीकृतम् ।कथाया: प्रयोग: तदानीम् आचारस्य लोकव्यवहारस्य च शिक्षा- दीक्षयो: कृते आसीत् ।पञ्चतन्त्र-हितोपदेश-बृहत्कथामञ्जरी-कथासरित्सागरादय: तदानीन्तया: प्रसिद्ध: ग्रन्था: ।तत:परं बेतालपञ्चविंशति:,सिंहासनद्वात्रिंशतिका चेत्यादय:अपि कथासाहित्ये प्रसिद्धा: ।अत: साहित्यस्य भेदत्वात् कथाया: शिक्षणपर्यन्तं महत्वपूर्णम् ।प्राम्भिशिक्षायां प्रविधित्वेन इतिहास-भूगोल-सामान्यविज्ञान-गणितादि-विषयेषु कथाया: स्थानमवश्यं स्मरणीयम् ।शिशव: छात्रा: वा कथासु रुचिमन्त: भवन्ति । अत: प्रारम्भिकशिक्षायां तदर्थं कथा आश्रीयते ।अक्षरशिक्षणात् प्रारभ्य विषयाणां पाठनपि कथाप्रविधौ अत्यन्तं रुचिकरं भवति ।यद्यपि कथाया: प्रमुखमुद्देश्यं मनोरञ्जनं, तथापि कल्पनाशक्ते: स्मरणशक्तेश्च विकासाय कथाशिक्षणं प्रामुख्यं भजति ।अन्नेकेषां विषयाणां कथामाध्यमेन शिक्षणस्य इदमेव तात्पर्यम् ।द्रुतपाठे स्वाध्यायप्रवृत्ते: विकासाय कथाया: सन्निवेश: प्राधान्य भजति ।

**कथानां वैशिष्ट्यानि**

1.कथाया: विभिन्नतत्त्वानि कथानकं,चरित्रचित्रणं,कथोपकथनं,भाषा-शैली,शीर्षक: एवञ्च उद्देश्यस्य दृष्ट्या संस्कृतकथा उच्चस्तरीया: सन्ति ।एतासां कथानकं क्रमबद्धै: जीवनोपयोगिपरिस्थितिभिश्च सम्बन्धितमस्ति ।पशुपक्षिण: मनुष्यान् च पात्ररूपे सङ्कलितवन्त: ।इदमुपदेशात्मकं शिक्षात्मकञ्च वर्तते ।एतासु आदर्शभाषाया: प्रयोग: कृत: भाषा अतीव सरला सुग्राहया च वर्तते ।

2.आभि: मनोरञ्जनेन सह नीते: सदाचरणस्य च शिक्षा अपि प्राप्यते ।

3.इमा: कथा: कौतूहलपूर्णा: सन्ति ।कल्पना एव आसां विकासस्य प्रादुर्भावस्य च स्रोतोऽस्ति ।

4.कथा: मानवेषु व्यवहारकौशलोतपादने सहायिका: भवन्ति,यतोहि आभि: पाठकेषु नैतिकगुणानां विकासो भवति ।

5.आभि: धर्म-अर्थ-कामश्चेति त्रिवर्गस्य प्राप्तिर्भवति ।

6.इमा: कथा: देवभाषाया: पाठनशैल्या: आदर्शमपि उपस्थाप्यन्ति ।

7.कथा: जटिलभावानां स्पष्टीकरणे सहायिका: भवन्ति ।
8.कथामाध्यमेन बालानां मस्तिष्कान् प्रभावशालीरूपेण प्रभावयितुं शक्यते ।यतोहि बाला: कथा: एकाग्रचित्तो भूत्वा शृण्वन्ति एवञ्च ता: तेषामन्तर्मन: ।
9.कथाप्रसङ्गे आगतानां शब्दानां, वाक्यानां,लोकोक्तीनाञ्च वास्तविकार्थं ते सरलतया गृह्णान्ति ।
10.कथामाध्यमेन सांसरिकज्ञानस्य वृद्धिर्भवति ।
11.कथामाध्यमेन बालेषु तर्कशक्ति-विवेक- संकल्प-इत्यादीनां सद्गुणानां वृद्धिर्भवति ।
12.कथामाध्यमेन कल्पनाशक्ते:विकास एवञ्च भावानाम् अभिव्यक्तिकरणस्य क्षमताया: प्रादुर्भावो भवति ।
उपसम्हार:

लघु लघु बालानां मन: विचित्रं भवति । तेषां बालानां पाठनं सर्वेषां कृते नातिसरलं भवति । एतदर्थं बालानां मानसं सम्यगालोच्य अनेकविधीनां साहाय्यं स्वीकृत्य शिक्षणं दद्यात् गुरु: । न सर्वथा एका पद्धति: सर्वदा सरवस्मिन् काले योग्याल भवति । कालानुगुणं विधे: प्रविधेर्वा परिवर्तनं करणीयमेव । तद्यथा  गूगलद्वारा अभ्यास:,सामान्यश्यामफलकानां स्थाने स्मार्टबोर्ड द्वारा शिक्षणम् ,पुस्तकानां भारनिवारणाय टैबद्वारा शिक्षणम् इति । इत्थं परिवर्तनं वाञ्छति ।

**सन्दर्भग्रन्थसूची-**


1. शिक्षामनोविज्ञानम् -प्रो. लोकमान्यमिश्र:
2. संस्कृतशिक्षणविधय:-डॉ.संतोषमित्तल:
3. संस्कृतशिक्षणविधय:-प्रो.चा.ल.न शर्मा
4. हिन्दीशिक्षणविधय:-प्रो.रजनीकान्तशुक्ल:
5. शिक्षामनोविज्ञानम् -प्रो.रामशकलपाण्डेय:
6. शिक्षामनोविज्ञानम् -डॉ.पी.डी.पाठक:
7. भारतीयशिक्षादर्शनम् -प्रो.सोमनाथसाहु:
8. मानवाधिकारशिक्षा-डॉ.भाग्यसिंह गुर्जर:
9. शिक्षाया: मनोवैज्ञानिकाधारा:-डॉ.बि.पद्ममित्रश्रीनिवास:
10. मनोविकृति विज्ञान-सं.रामजीश्रीवास्तव
11. मनोविज्ञान,समाजशास्त्र तथा शिक्षायां शोधविधय: -अरुणकुमार सिंह:
12. हिन्दीशिक्षणम् -डॉ.रघुनाथसफाया
13. भाषाविज्ञानम्-डॉ.उदयनाथतिवारी
14. भाषाविज्ञानम्-डॉ.भोलाझा:
15. पञ्चतन्त्रकथा-पं.विष्णुशर्मा